# संस्कृतम्

# (309)

समयः —होरात्रयम् ]    [ पूर्णाङ्काः —100

**निर्देशाः —** (i) अस्मिन् प्रश्नपत्रे **द्वौ** खण्डौ स्तः। खण्ड—क (केन्द्रिक पाठ्यक्रमः), खण्ड—ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः।

(ii) खण्ड—क अनिवार्यः। अस्मिन् खण्डे *20* प्रश्नाः सन्ति।

(iii) खण्ड—ख **एकः** एव वैकल्पिकः समाधेयः।

(iv) खण्ड—क कृते *85* अङ्काः, खण्ड—ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः। अस्य कृते *15* अङ्काः निर्धारिताः।

## खण्ड—क

## केन्द्रिक पाठ्यक्रमः

**1.** अधोलिखितेषु कस्यचि**देकस्य** पाठस्य सारं षड्वाक्येषु लिखत—    6

(क) परार्थे आत्मोत्सर्गः

(ख) अतिलोभः न कर्त्तव्यः

(ग) अनन्तः ज्ञानसागरः

**2.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत—    1×4=4

अथ किंचिद् दूरं गतेषु तेषु एकस्य अन्यस्य वर्त्तिका अपतत्। सः अपि खनितुम् आरभत, रूप्यमयीं भूमिम् अलभत। अहो! यथेच्छं रूप्यं स्वीकुरुत। नाग्रे गन्तव्यम्। तौ उक्तवन्तौ—भोः! पूर्वं ताम्रं पुनः रूप्यं, नूनम् अग्रे स्वर्णं भविष्यति।

**प्रश्नाः**

(क) एकस्य अन्यस्य वर्त्तिका कदा अपतत्?

(ख) सः कीदृशीं भूमिम् अलभत?

(ग) यथेच्छं रूप्यं प्राप्य एकेन किम् उक्तम्?

(घ) 'अग्रे स्वर्णं भविष्यति' इति उक्त्वा द्वौ सुहृदौ किं वाञ्छतः?

**3.** अधोलिखितानां प्रश्नानाम् उचितमुत्तरं चित्वा लिखत— 1×4=4

(क) चक्रधरस्य मस्तकात् किम् अवहत्?

( रुधिरम् / चक्रम् )

(ख) भरतेन दक्षिणदेशः कस्मै दत्तः?

( कुमार्यै / देव्यै )

(ग) वेदम् अनूच्य आचार्यः कम् अनुशास्ति?

( गृहस्थं / शिष्यम् )

(घ) बकासुरः प्रतिदिनं कान् भक्षयति?

( जीवान् / जनान् )

**4.** (क) रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत— 1×2=2

*(i)* विवेकानन्दस्य प्रतिभा स्मारकस्य मध्ये वर्तते।

*(ii)* क्रमेण एकदा ब्राह्मणस्य वारः समायातः।

(ख) प्रश्नान् उत्तरत— 1×2=2

*(i)* शल्यचिकित्सकैः व्रणसीवनार्थं किं युज्यते?

*(ii)* कः प्रकाशस्य वेगं वर्णितवान्?

**5.** एतत् कथनं कः कं प्रति कथयति? 2

(क) आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।

(ख) ततो मर्षय भगवन्, अभूमिरेषा शापस्य।

**6.** अधोलिखितपद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत— 2+2=4

(क) समुद्वहन्तः सलिलातिभारं,
बलाकिनो वारिधरा नदन्तः।
महत्सु श्रृंगेषु महीधराणां,
विश्रम्य विश्रम्य पुनः प्रयान्ति॥

**प्रश्नद्वयम्**

*(i)* वारिधराः कुत्र विश्रम्य प्रयान्ति?

*(ii)* मेघाः किं समुद्वहन्तः गच्छन्ति?

(ख) दुःखेन श्लिष्यते भिन्नं, श्लिष्टं दुःखेन भिद्यते।
भिन्ना श्लिष्टा तु या मैत्री न सा स्नेहेन वर्तते॥

**प्रश्नद्वयम्**

*(i)* कीदृशी मैत्री दुःखेन श्लिष्यते?

*(ii)* का मैत्री स्नेहेन न वर्तते?

**7.** अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत— 2

(क) अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत्।
जयेत् कदर्यं दानेन, जयेत् सत्येन चानृतम्॥

अन्वयः —

क्रोधम् अक्रोधेन ________ *(i)*, असाधुं साधुना जयेत्, कदर्यं ________ *(ii)* जयेत्, अनृतं च सत्येन जयेत्।

(ख) कस्तूरी जायते कस्मात्, को हन्ति करिणां कुलम्?
किं कुर्यात् कातरो युद्धे, मृगात् सिंहः पलायनम्॥

अन्वयः —

कस्तूरी कस्मात् जायते, क ________ *(i)* कुलं हन्ति? ________ *(ii)* युद्धे किं कुर्यात्?

**8.** अधोलिखित-पद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत— 2

(क) सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।

भावार्थः —

ये सन्तोषरूपिणा अमृतेन तृप्ताः, ते एव ——— प्राप्नुवन्ति।

(ख) ब्रह्म सूर्यसमं ज्योतिः।

भावार्थः —

सूर्येण समं ज्योतिः किम्? ———।

**9.** पद्यांशं 'अ' स्तम्भात् 'ब' स्तम्भेन सह मेलयत— 2

| स्तम्भ—अ | | स्तम्भ—ब | |
|---|---|---|---|
| *(i)* | तृणानि भूमिरुदकं | (क) | उभयं नाशयेदिदम् |
| *(ii)* | अपूजितं तु तद् भुक्तम् | (ख) | अश्वाः वहन्ति मे रथम् |
| *(iii)* | अनेकसुशिरं वाद्यम् | (ग) | वाक् चतुर्थी च सूनृता |
| *(iv)* | नित्यं रथेन गच्छामि | (घ) | कान्तं च ऋषिसंज्ञितम् |

**10.** 'काले फलति सौभाग्यम्' इति नाटकस्य सारांशं षड्वाक्येषु लिखत। सहायतायै बिन्दवः दत्ताः — 6

**बिन्दवः**

लब्धदत्तः, निर्धनः, राज्ञः, कृतवान्, राजा, बीजपूरफलं, उदरपूरणाय, एकेन, रूप्यकेण, राजा परीक्षितुं, साधुं, नर्तकीं, व्यापारिणम्, सर्वे, अयच्छत् राज्ञे, अन्ते, प्रदर्श्य रत्नानि, यच्छति।

**11.** (क) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत— 1+1=2

राजा : सावेगमिव मे हृदयम्। गच्छ, यथानिर्दिष्टौ चाणूरमुष्टिकौ प्रवेशय।

भटः : यदाज्ञापयति महाराजः। (निष्क्रान्तः)

राजा : यावदहमपि प्रासादमारुह्य चाणूरमुष्टिकयोर्युद्धं पश्यामि। (आरुह्य) मधुरिके विघाट्यतां द्वारम्।

प्रतीहारी : यद् भर्ता आज्ञापयति।

(राजा प्रविश्योपविशति)

(ततः प्रविशतः चाणूरमुष्टिकौ)

भटः : एष महाराजः। उपसर्पेतां भवन्तौ।

उभौ : (उपेत्य) जयतु भर्ता।

राजा : चाणूरमुष्टिकौ सर्वप्रयत्नेन युवाभ्यामानृण्यं कर्त्तव्यम्।

उभौ : श्रृणोतु भर्ता। करणसन्धाबन्धप्रहारैः युद्धविशेषैः सिद्धिं गच्छामः।

**प्रश्नाः**

*(i)* 'युवाभ्याम् आनृण्यम् कर्त्तव्यं' इति कंसः कौ प्रति कथयति?

*(ii)* चाणूरमुष्टिकौ कस्मिन् युद्धविशेषे दक्षौ आस्ताम्?

(ख) विभवानुगता भार्या सुखदुःखसुहृद् भवान्।
सत्यं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्॥

*(i)* चारुदत्तस्य भार्या कीदृशी?

*(ii)* दरिद्रेषु किं दुर्लभं भवति? 1×2=2

**12.** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त-प्रश्नान् उत्तरत—

(क) **गद्यांशः**

अस्माकं मानसिकविकृतिकारणात् अनेके रोगाः जायन्ते। मनसोऽशान्तिः बहुरोगान् जनयति, सामाजिकं वातावरणं च नाशयति। अतएव अस्माभिः मनः शुद्धं कर्त्तव्यम्। यदि मनः निर्मलं भविष्यति, तदैव अस्माकं विचाराः शुद्धाः चिन्तनं शुद्धं भविष्यति, येन पर्यावरणस्य विशुद्धिः अवश्यमेव भविष्यति।

**प्रश्नाः**

*(i)* कस्मात् कारणात् अनेके रोगाः जायन्ते? 2

*(ii)* यदि मनः निर्मलं भविष्यति तदा किं भविष्यति? 2

*(iii)* मनसः अशान्तिः किं नाशयति? 1

(ख) **पद्यांशः**

अस्त्युत्तरस्यां दिशि देवतात्मा,
हिमालयो नाम नगाधिराजः।
पूर्वा परौ तोयनिधीवगाह्य,
स्थितः पृथिव्या इव मानदण्डः॥

**प्रश्नाः**

*(i)* नगाधिराजः कः कथ्यते? 1

*(ii)* हिमालयः कुत्र स्थितः? 2

*(iii)* हिमालयः किमिव स्थितः अस्ति? 2

**13.** मञ्जूषापदसहायतया 'ऋतुराजः वसन्तः' इति विषयमधिकृत्य दशवाक्यानि लिखत। 10

| **मञ्जूषा** |
|---|
| भारते, भवन्ति, षड्ऋतवः, ऋतुराजः, कुसुमैः, भ्रमराः, नवीनानि, पत्राणि, पुष्पाणि, सुगन्धः, मंजर्यः, कोकिलाः, आकाशः, जीवने, चेतनता। |

**14.** भवान् गौरवः। भवताम् उपनगरे पत्रालयः नास्ति। तदर्थं महापत्रालयपालकं प्रति पत्रं लिखत। 6

**15.** भवतः नाम सुरेशः। परश्वः भवतः जन्मोत्सवः अस्ति। अतः स्वमित्राय उदिताय जन्मोत्सवकार्यक्रमम् उपलक्ष्य संवादं लिखत। चत्वारि वाक्यानि लिखत। 1×4=4

**16.** रेखाङ्कितपदे सन्धिच्छेदं कुरुत— 1

(क) वृक्षाग्रे फलं दृष्टम्, फलाग्रे वृक्ष एव च।

(ख) अपनीय स्वयं तद्धि तैर्न्यस्तं तस्य वेश्मनि।

**17.** (क) ''चक्रिणा च सदाराध्यं यो जानाति स पण्डितः।''

रेखाङ्कितपदे का विभक्तिः किं च मूलपदम्? 2

(ख) बाणासुरः कस्य पुत्रः आसीत्? सः जनान् अरक्षत्।

रेखांकितपदद्वयं लट्लकारे परिवर्त्य लिखत। 2

(ग) यथानिर्दिष्टं वाच्य-परिवर्तनं कुरुत— 1

सः परार्थे शरीरं ददाति। (कर्मवाच्ये)

**अथवा**

राक्षसेन जीवहिंसा त्यज्यते। (कर्तृवाच्ये)

**18.** समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत— 1×5=5

(क) किराताः छायां ——— गच्छन्ति। (नि + सेव् + ल्यप्)

(ख) विमाने सौर-ऊर्जं ——— सञ्चार्यमाणानि विमानानि वर्णितानि। (उप + युज् + ल्यप्)

(ग) पृथिव्यां सर्वे ——— क्षेमाय भवन्तु। (पादप + उचित-विभक्तिः)

(घ) रजकः ——— वस्त्राणि क्षालयति। (नदी + उचित-विभक्तिः)

(ङ) पिता पुत्रीं पाठशालाम् ———। (नी + लट्लकारः)

**19.** रेखाङ्कितपदस्य विग्रहं कृत्वा लिखत— 2

(क) हिमालयो नाम नगाधिराजः।

(ख) किं दानमनाकाङ्क्षम्।

**20.** अधोलिखितवाक्ये **एकम्** अव्ययम् **एकम्** उपसर्गं च चित्वा लिखत— 2

(क) भवन्तः कुत्र गच्छन्ति?

(ख) पर्यावरणस्य संरक्षणं करणीयम्।

## वैकल्पिक–I

## ( संस्कृतं संस्कृतिश्च )

**21.** अधोलिखितकाव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत— 2

| | 'अ' | | 'ब' |
|---|---|---|---|
| *(i)* | जानकीजीवनम् | (क) | रामभद्राचार्यः |
| *(ii)* | इन्दिरागान्धीचरितम् | (ख) | जी० बी० पल्सुले |
| *(iii)* | श्रीभार्गवराघवीयम् | (ग) | राजेन्द्र मिश्रः |
| *(iv)* | जवाहरज्योतिमहाकाव्यम् | (घ) | सत्यव्रत शास्त्री |

**22.** अधोलिखितप्रश्नान् उत्तरत—

(क) अधोलिखितसंख्यानां कृते संस्कृतपदानि लिखत— 2

$10^5$, $10^6$, $10^8$, $10^9$

(ख) आर्यभट्टस्य कस्मिन् क्षेत्रे महत्त्वपूर्णं योगदानमस्ति? तस्य ग्रन्थस्य किं नाम अस्ति? 2

(ग) संस्कृतवाङ्मये प्रसिद्धगणितज्ञस्य श्रीब्रह्मगुप्तस्य ग्रन्थनाम लिखत। 1

(घ) आयुर्वेदस्य ओषधीनां गुणदोषवर्णनार्थं के ग्रंथाः विरचिताः? 2

**23.** संस्कृतस्य प्राचीनतमं रूपं किम्? तद्रूपं वयं कुत्र प्राप्नुमः? 1+1=2

**24.** (क) भारतीयसंस्कृतेः व्यवस्थितरूपं कस्मिन् युगे प्राप्यते? 1

(ख) पुरुषार्थाः के? तेषां नामानि लिखत। 2

(ग) नामकरणसंस्कारः जन्मनः कस्मिन् दिने क्रियते? 1

# वैकल्पिक–II

## ( प्रयोजनमूलकसंस्कृतम् )

**21.** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत— 1×4=4

(क) संस्कृतभाषायाः विविधरूपाणां ——— तस्याः प्रयोजनम्।

(ख) आर्यभट्टः महान् ——— आसीत्।

(ग) आकाशवाणीतः ——— प्रातः सायं च संस्कृतवार्तानां प्रसारणं भवति।

(घ) संस्कृतज्ञानां कृते ——— पर्याप्ताः अवसराः सन्ति।

**22.** अधोलिखित-प्रश्नान् उत्तरत— 1×4=4

(क) सञ्चारमाध्यमः कः कथ्यते?

(ख) स्वातन्त्र्यदिवसावसरे कस्मिन् कविसम्मेलने संस्कृतस्य अपि कश्चन सुकविः आमन्त्र्यते?

(ग) दूरदर्शने प्रस्तुतस्य सर्वप्रथम संस्कृतनाटकस्य किं नाम?

(घ) संस्कृते वार्त्ताप्रसारणस्य अवसानं किं कथयित्वा उद्घोष्यते?

**23.** पाक्षिकी पत्रिका का भवति? एकस्याः पाक्षिकपत्रिकायाः नामोल्लेखं कुरुत। 2

**24.** (क) पत्रिकायाः भाषा कीदृशी भवेत्? 1

(ख) अन्तिमरूपेण मुद्रणात् प्राक् सामग्र्याः अशुद्धि-संशोधनार्थं किं क्रियते? 1

(ग) साम्प्रतं मुद्रणकार्ये कस्य यंत्रस्य अप्रतिमं महत्त्वं वर्तते? 1

(घ) त्रुटिशोधने प्रयुक्तम् अधोलिखितचिह्नद्वयं अभिप्रायेण सह मेलयत— 2

| ‘अ’ | ‘ब’ |
|---|---|
| ( - ) | विवरणचिह्नम् |
| ( : ) | योजकचिह्नम् |

★ ★ ★